दशमः पाठः १०

# दीनबन्धुः विवेकानन्दः



प्रात:कालस्य समयः आसीत्। पौषमासस्य अतीव शीतदिवसः। सूर्योदयः अभवत् तथापि मेघाच्छन्ने गगने इदानीमपि पूर्णप्रकाशस्य अभावः आसीत्। कोलकातानगरस्य राजपथेषु इतस्ततः जनाः अटनार्थं गच्छन्ति स्म। नरेन्द्रः अपि मार्गे गच्छति स्म। सहसा तस्य पादः किमपि वस्तु अस्पृशत्। सः व्यरमत् सम्यक् दर्शनेन ज्ञातवान् यत् जीर्णशीर्णैः वस्त्रैरावृतः कोऽपि मानवः मार्गे पतितः। तम् उत्थापयन् ''उत्तिष्ठ बन्धो ! उत्तिष्ठ।'' इति नरेन्द्रः उक्तवान् किन्तु सः अन्धः पङ्गुः चेतनाविहीनश्च आसीत्। तस्य मस्तकम् अपि रुधिरक्लिन्नम् आसीत्। नरेन्द्रः स्ववस्त्रेण तस्य मस्तके व्रणपट्टिकाम् अबध्नात्। अनन्तरं स्वकम्बलेन तम् आच्छादितवान्।

कतिपयकालानन्तरं प्राप्तायां चेतनायां नरेन्द्रः तं वृद्धम् ''भवान् कः ? एतादृशी गतिः कथम् अभवत्'' इति पृष्टे सति सः वृद्धः नेत्रे शून्ये प्रसार्य निःश्वस्य च उक्तवान्- ''जन्मना अस्पृश्यः अशुभदर्शनः अस्मि। मम दुर्भाग्यशालिनः मुखदर्शनेन भवतः एतद् दिनं व्यर्थम् अमङ्गलं च न भवेत्।'' तस्य नेत्रभ्याम् अश्रुधारा प्रवहति स्म।

नरेन्द्रः तं सान्त्वयन् सोद्वेगं ''अरे जन्मना एव कथम् अस्पृश्यता अपवित्रता अशुभदर्शनं च। वयं सर्वे ईश्वरस्य वरदपुत्राः। अस्तु भवतः एतां दुर्गतिं के कृतवन्तः'' इति पृष्टवान्।

ततः ''प्रभाते मङ्गलध्वनिं श्रुत्वा मन्दिरं मत्वा एकस्मिन् भवनं प्रविष्टवान्। तत्र अशुभदर्शनः अपवित्रः अस्पृश्यः इति उक्त्वा मां ताडितवन्तः। अन्धत्वेन न ज्ञातवान् के आसन् ते इति।''

नरेन्द्रस्य हृदयः व्यथितः सञ्जातः। करुणया तस्य स्कन्धे स्वहस्तं निधाय ''भवतः कुत्र गन्तव्यम् ?'' इति पृष्टे सति वृद्धः ज्ञापितवान् यत् सः रामकृष्णपरमहंसस्य आश्रमं गन्तुमिच्छति। नरेन्द्रः तं वृद्धं स्कन्धे निधाय गन्तव्यं प्रति प्रस्थितः।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| अतीव | अत्यधिकम् | बहुत अधिक |
| मेघाच्छन्ने | मेघावृते | बादलों से ढके |
| राजपथेषु | राजमार्गेषु | सड़कों पर |
| अटनार्थं | भ्रमणार्थम् | घूमने के लिये |
| रुधिरक्लिन्नम् | रक्तेन आर्द्रम् | रक्त से गीला |
| प्रसार्य | विस्तार्य | फैलाकर |
| सान्त्वयन् | धैर्यं प्रदाय | धीरज बंधाकर |
| प्रविष्टवान् | प्रवेशं कृतवान् | प्रवेश किया |
| गन्तव्यं | गमनस्थानं | गमन स्थान को |
| निधाय | संस्थाय | रखकर |
| प्रस्थितः | चलितः | प्रस्थान किया |
| सञ्जातः | अभवत् | हुआ |



## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

मेघाच्छन्नेः इतस्ततः अस्पृशत् उत्थापयन् रुधिरक्लिन्नम्

व्रणपट्टिकां अबध्नात् जीर्णशीर्णः ज्ञापितवान् प्रस्थितः।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) कस्मिन् मासे अतीव शीतदिवसः आसीत् ?

(ख) मार्गे कः पतितः आसीत् ?

(ग) ''भवान् कः'' इति कः पृष्टवान् ?

(घ) वयं सर्वे कस्य वरदपुत्राः ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत –**

(क) ''उतिष्ठ बन्धो! उतिष्ठ'' इति कः उक्तवान् ?

(ख) नरेन्द्रः वृद्धं केन आच्छादितवान् ?

(ग) कस्य नेत्राभ्याम् अश्रुधारा वहति स्म ?

(घ) अशुभदर्शनम् इति मत्वा वृद्धं के ताडितवन्तः ?

(ङ) कस्य हृदयः व्यथितः सञ्जाताः ?

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) जनाः कुत्र अटन्ति स्म ?

(ख) वृद्धः कीदृशः आसीत् ?

(ग) वृद्धस्य दुर्गतिं के कृतवन्तः ?

(घ) कोलकातानगरस्य वातावरणं कथम् आसीत् ?

(ङ) वृद्धः कुत्र प्रविष्टवान् ?

३. **मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानानि पूरयत -**

**अश्रुधारा, गतिः, रक्तधारा, मस्तकम् अन्धत्वेन, जन्मना**

(क) तस्य ........................ रुधिरक्लिन्नम् आसीत् ।

(ख) एतादृशी ............................ कथम् अभवत् ।

(ग) ....................... अस्पृश्यः अशुभदर्शनः अस्मि ।

(घ) नेत्रभ्याम् ............................... प्रवहति स्म ।

(ङ) ........................... न ज्ञातवान् के आसन् ते ?

४. **अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यानि रचयत -**

| **शब्दः** | | **उदाहरणम्** |
|---|---|---|
| सर्वदा | - | अहं सर्वदा सत्यं वदामि । |
| तस्य | - | ..................................... । |
| आसीत् | - | ..................................... । |
| भवतः | - | ..................................... । |
| मम | - | ..................................... । |
| प्रवहति | - | ..................................... । |

५. **अधोलिखितेषु पदेषु सन्धिविच्छेदं कुरुत -**

| **पदम्** | **सन्धिविच्छेदः** | | | |
|---|---|---|---|---|
| (क) सूर्योदयः | .................... | + | .................... | । |
| (ख) तथापि | .................... | + | .................... | । |
| (ग) नरेन्द्रः | .................... | + | .................... | । |
| (घ) सोद्वेगम् | .................... | + | .................... | । |
| (ङ) मेघाच्छन्ने | .................... | + | .................... | । |

६. **अधोलिखितानां रेखाङ्कितपदानाम् आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) <u>अस्मिन्</u> पाठे दीनबन्धुः विवेकानन्दः अस्ति ।

(ख) राजपथेषु जना <u>अटनार्थं</u> गच्छति ।

(ग) नरेन्द्रः वस्त्रेण <u>तस्य</u> व्रणपट्टिकाम् अकरोत् ?

(घ) मन्दिरं मत्वा <u>एकस्मिन् भवनं</u> प्रविष्टवान् ?

(ङ) तस्य नेत्राभ्याम् <u>अश्रुधारा</u> प्रवहति ?

## योग्यता-विस्तारः

### (क) पाठविस्तारः

**श्रीरामकृष्णपरमहंसः**



यदा स्वामिदयानन्दः उत्तरभारते आर्यसमाजस्य प्रचारमकरोत् तदैव बंगप्रान्ते रामकृष्णपरमहंसः स्वोपदेशैर्नवजीवनसञ्चारं करोति स्म। रामकृष्णमहोदयानां जन्म हुगलीजनपदे एकस्मिन् निर्धनब्राहणपरिवारे अभवत्। विवाहितोऽपि विरक्तोऽयं विंशतिवर्षावस्थायामेव संन्यासी भूत्वा षण्मासं यावत् समाधिस्थः योगसाधनामकरोत्। तेषामुपदेशाः सरलाः प्रभावपूर्णाश्चासन्। जनाः परस्परं सहिष्णुतां प्रदर्शयेयुः। दरिद्रनारायणस्य सेवा वस्तुतः परमेश्वरसेवा वर्तते। स्वामिविवेकानन्दः तेषां प्रमुखः शिष्यः आसीत्। श्रीरामकृष्णपरमहंसः परमास्तिकः कालिभक्तः दरिद्राणामुद्धारकः सिद्धपुरुषश्च आसीत्।

### (ख) भाषाक्रीडा

सर्वे बालकाः मण्डलनिर्माणं करिष्यन्ति। शिक्षकः मध्ये स्थित्वा प्रत्येकं बालकम् आदिशति यत् एकेन श्वासेन महापुरुषाणां नामानि वदत। एवमेव सर्वेषां बालकानां क्रमः आगमिष्यति। यः बालकः एकेन श्वासेन सर्वाधिकानि नामानि वदति सः विजेता भवति।

### (ग) भाषाविस्तारः

**दा (देना) लङ् लकारः (भूतकाल)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अददात् | अदत्ताम् | अददुः |
| मध्यमपुरुषः | अददाः | अदत्तम् | अदत्त |
| उत्तमपुरुषः | अददाम् | अदद्व | अदद्म |

**क्री (खरीदना) लङ् लकार (भूतकाल)**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अक्रीणीत् | अक्रीणीताम् | अक्रीणन् |
| मध्यमपुरुषः | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| उत्तमपुरुषः | अक्रीणाम् | अक्रीणीव | अक्रीणीम |

## श्रु ( सुनना ) लङ्‌ लकार

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| मध्यमपुरुषः | अशृणोः | अशृणुतम् | अशृणुत |
| उत्तमपुरुषः | अशृणवम् | अशृणुव | अशृणुम |

## ज्ञा ( जानना ) लङ्‌ लकार

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजानात् | अजानीताम् | अजानन् |
| मध्यमपुरुषः | अजानाः | अजानीतम् | अजानीत |
| उत्तमपुरुषः | अजानाम् | अजानीव | अजानीम |